© 2018 IJSRSET | Volume 4 | Issue 1 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099
Themed Section : Engineering and Technology

# उत्तररामचरिते करुणरसविमर्शः

**डॉ राजकुमार**

उत्तरप्रदेशान्तर्गतसोनभद्र–
जनपदान्तर्गतसरवट–ग्रामे–231215



**''कारुण्यं जगतो मूलं काव्यमूलं निसर्गतः।**
**करुणार्द्रस्य स्वान्तस्य रससिद्धिरनुतमा।।''**[1]

भारोपीयपरिवारस्य सर्वासु भाषासु संस्कृत भाषा प्राचीनतमा वर्त्तते। संस्कृतवाङ्मयेतिहासे नाट्यसाहित्यम् अतिसमृद्धं वर्त्तते। नाट्यसाहित्यजगति कालिदासान्तरं **'एको रसः करुणेव'** इति मतस्य उद्घोषकस्य महाकवि भवभूतेः नाम इह वसुधातले को न जानित? काश्यपगोत्रोत्पन्नः भवभूतेः जननी जातुकर्णी जनकश्च श्रीनीलकण्ठो आस्ताम्। अस्य कवेः गुरो नाम ज्ञाननिधिः। भवभूति कान्यकुब्जेवरस्य श्रीमतो यशोवर्मण आश्रितो आसीत्। अयं कविः व्याकरण न्यायमीमांसा शास्त्रेषु पण्डितः। अस्तु पद–वाक्य–प्रमाणज्ञ' उपाधिना समलंकृतोऽभूत्। वाक्देवी तं (भवभूतिं) सर्वदाऽनुवर्त्तते–इत्येतत् सः स्वयमेव उद्घोषयति–

**यं ब्रह्माणामियं देवी वग्वश्येवाऽनुवर्त्तते।**[2]

संस्कृत–साहित्ये भवभूति–विरचितानि–त्रीणि नाटकानि विलसन्ति–महावीरचरितम् मालतीमाधवम्, उत्तररामचरितम् च।

प्रायः संस्कृतकवयः नाट्यशास्त्रस्य नियमानाम् अनुसरणं कृतवन्तः स्वरचनासु, किन्तु महाकवि भवभूति परम्परावादी न विद्यते। कविरयं प्रधान रसरूपे श्रृंगाररस्य वीरस्य च स्थानं न दत्तवान्। भवभूति स्वरचनासु सिद्धम् कृतवान् यत्–करुणरस एव सर्वेषां रसानाम् जनकः विद्यते। **'एको रसः करुण एव' 'कारुण्यं भवभूतिरेव तनुते'** आदयः उक्तयः तम् प्रति प्रसिद्धाः सन्ति। 'कारुण्यं भवभूतिरेव तनुते' एका सत्या उक्ति वर्त्तते।

करुणरसनिस्यन्दे नातिशेतोऽन्यो महाकविममुम्। अतः साधूच्यते **–''कारुण्यं भवभूतिरेव तुनते। करुणरसोद्रेकमालोक्यैव कवेरेतस्य कृतिषु कृर्तिभिः कृतानि कतिपयानि प्रषंसापद्यानि। ''आर्यासप्तशत्यां श्रीगोवर्धनाचार्यो भवभूतेर्भारतीं भूधरसुतया गौर्योपमिमीते।''** तत्कृतकारुण्ये ग्रावणोऽपि रुदन्त्यन्येषां ते का कथा? भवभूते सम्बन्धाद्भूधरभरेव भारतीभाति। एतत् कृत कारुण्ये किमन्यथा रोदिति ग्रावा। कारुण्ये कालिदासादत्यतिरिच्यते। अतः उच्चते–

**''उत्तरेरामचरिते तु भवभूतिर्विशिष्यते''।**[3]

करुणरस प्रवाहपरीक्ष्या परीक्ष्यते चेन्नाटकत्रयमस्य तर्हि उत्तररामचरितमेव सर्वातिशायि। यथात्र कारुण्य रस निस्यन्दो, न तथाऽन्यत्र। करुणरसस्य प्रवाह एव कारुण्यमिति। इदम् अत्र अवधेयम्। भवभूतिः करुणरसं रसत्वेनैव नातिष्ठतेऽपि तु रसानां समेषां मूलभूतत्वेने करुणमेवैकं रसमनुते। रसाः अन्येऽस्यैव विवर्त्तरूपेण परिणामरूपेण वा परिणमन्ते इति करुणरसस्य महत्त्वमातिष्ठते। आह च–

**'एको रसः करुण एव निमित्त भेदा–**

**र्भिन्नः पृथक्पृथगिवाश्रयते विवर्तान्।**

**आवर्तबुद्बुदतरंगमयान्विकारा–**

**नम्भो यथा सललिमेव तु तत्समग्रम्।।[4]**

उत्तररामचरितं प्रथमे अंके आदावेव पितृवियोगविषण्णां जानकीमाश्वसयति दाशरथिः। गृहस्थधर्मस्य विघ्नव्यात्तत्वं व्याचाष्टे।। संकटा ह्याहिताग्नीनां प्रत्यवायैगृहस्थता। उत्तररामचरिते प्रथमांके एव लोकापवादम् उपश्रुत्य लोकरंजनार्थ प्राणप्रियां वनसहचारिणीं सीतामपि परित्यक्तुम् प्रतिज्ञावतो रामभद्रस्य निश्चयेन सहृदय हृदयक्षेत्रे करुणबीजस्य वपनं भवति तदेव तृतीयांके पुनर्जन–स्थान विलोकयतो रामस्य करुणाविलापैः वासन्ती–वचनविन्यासैः सीतायाः करुणभाषणैः देशकालादि सम्पत्या समङ्कुरितं पुष्पितं फलितश्च विलोक्यते। सीतास्मरणजनिते शोकसागरे निमग्नस्य पुनः पुनः सीताकरस्पर्शेन धारितजीवनालग्बस्य रामभद्रस्य स्वावस्था प्रदर्शिका करुणोक्तिः निदर्शनीभूतेव वत्तेते–

**'दलति हृदयं शोकोद्वेगाद् द्विधा न तु भिद्यते,**

**वहति विकलः कायो मोहं तु न मुंचति चेत्।**

**ज्वलयति तनुमन्तर्दाहः करोति न भस्मसात्,**

**प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्।।[5]**

चित्रे रावणकृत जानकी हरणवृतं वीक्ष्य खिद्यते चेतश्चारुचरितस्य राघवस्य। जनस्थाने सतिसीताहरणे कथमतप्यत राम इति लक्ष्मणो वर्णयति तस्य कारुण्यपूर्णो स्थितिम्। तस्य विकल्वत्वं विलोक्य ग्रावणोऽप्यरुदन् वज्रस्यापि हृदयं व्यदलत्–

**अथेदं रक्षोभिः कनकहरिणच्छद्यविधिना,**

**तथा वृत्तं पापैर्यथयत यथा क्षालितमपि।**

**जनस्थाने शून्ये विकलकरणैरार्यचरितैरपि–**

**ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।।[6]**

सीताहरण चित्रदर्शनेन विषण्मास्य विलपतष्च दाशरथेरवस्थां वर्णयति। वाष्पप्रसरं च मुक्ताहारेणोपमिमीते–

**अयं तावद् बाष्पस्त्रुटित इव मुक्तामणिसरो,**

**विसर्पन् धाराभिर्लुठति धरणीं जर्जरकणः।**

**निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया,**

**परेषामुन्नेयो भवति चिरमाध्यमातह्दयः।।[7]**

शम्बूक प्रसंगेन दण्डकारण्यं पंचवटीं च प्राप्य जानकीसहवासं स्मारं स्मारं खिद्यतेतामां मनो मनस्विनो रामस्य। सीता प्रवासनेन पापिनमात्मानं गणयन् पंचवटीदर्शनपात्रं मन्यते। तमसा दुःख क्षमां जानकीं करुणस्य मूर्तिरेव गणयति–

**परिपाण्डुदुर्बलकपोलसुन्दर–**

**दधती विलोलकबरीमाननम्।**

**करुणस्यमूर्तिरथवा षरीरिणी**

**विरहव्यथेव वनमेति जानकी।।[8]**

अन्ये च करुणरसाप्लुताः प्रमुखाः श्लोकाः दिङमात्रमत्र निर्दिष्यन्ते। ते यथायथं विवेच्याः।सीतापरित्यागविषण्णो रामोऽशरणो रोदितितराम्। दुःखपीड़ितं रामं जगन्निर्जनमिवा भाति–

**हा हा देवि! स्फुटति ह्दयं ध्वंसते देहबन्धः**

**शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि।**

**सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा**

**विष्वङमोहः स्थागयति कथं मन्द भाग्यः करोमि।।[9]**

उपर्युक्त विवरणैः इदम् स्पष्टं भवति यत् **''कारुण्यं भवभूतिरेव तनुते''** अक्षरशः सत्यम् प्रतीयते। परवर्ती कवयः तस्य विचारस्य अनुसरणं कृतवन्तः। अन्या उक्तयाः भवभूति संस्कृत साहित्येतिहासे अमरः जातः।

**कवयः कालिदासाद्या भवभूतिर्महाकविः**

**तरवः पारिजातद्याः स्नुही वृक्षो महातरुः।।[10]**

**सन्दर्भग्रन्थाः**


1.कपिल–संस्कृत साहित्य का इतिहास पृ0 231

2.उत्तररामचरितम् 1/2

3. उत्तररामचरितम् –टीकाकार श्रीआनन्दस्वरूप–3 अंक, श्लोक सं0 47

4.(उत्तररामचरितम् –टीकाकार श्रीआनन्दस्वरूप–3 अंक श्लोक सं 47)

5. उत्तररामचरितम् 1

6. उत्तररामचरितम् 1/28

7. उत्तररामचरितम् 1/29

8. उत्तररामचरितम् 3/4

9. उत्तररामचरितम् 3/38

10. उत्तररामचरितम् भूमिका पृ0 57